भिन्नाविति ज्ञात्वेत्यर्थः प्रकृतिपुरुषयोर्विवेकाग्रहणात् संसारः विवेकात् मुक्तिरिति साङ्ख्याः। अथ तां ख्यातिमपि निरोद्धुं निवर्त्तयितुं वाञ्छन्ति वृत्तिरूपान्तां निवर्त्य स्वयम्प्रकाशतयैव स्थातुमिच्छन्तीत्यर्थः” मल्लि०। ज्ञानरूपा ख्यातिश्चतुर्विधा असत्ख्यातिशब्दे ५२१ पृ० दर्शिता। “प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः”पात०सू०। “यदायं ब्राह्मणः प्रसङ्ख्यानेऽप्यकुसीदस्ततोऽपि न किञ्चित् प्रार्थयते तत्रापि विरक्तस्य सर्वथा विवेकख्यातिरेव भवतीति संस्कारवीजक्षयान्नास्य प्रत्ययान्तराण्युत्पद्यन्ते तदास्य धर्म्ममेघनामसमाधिर्भवति”भा०। “मनोमहान् मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः” इति शा०भा० दर्शिते हिरण्यगर्भबुद्धिरूपे ६महत्तत्त्वे च। “स्वप्ने यथात्मनः ख्यातिः संसृतिर्न तु वास्तवी” साङ्ख्यप्रवचनभाष्यधृतवाक्यम्।

**ख्यापक** त्रि० ख्या—ज्ञाने प्रकाशे णिचि ण्वुल्। १ज्ञापके २प्रकाशके“नित्यपुरुषख्यापकान् हेतून्” सुश्रुतः।

**ख्यापन** न० ख्या—प्रकाशे णिच्—भावे ल्युट्। प्रकाशने “ख्यापनेनानुतापेन तपसाध्ययनेन च। पापकृन्मुच्यते पापात् तथा दानेन चापदि” मनुः।

इति वाचस्पत्ये खकारादिशब्दार्थ

सङ्कलनम्।

---

२४६१पृष्ठस्य क्रोड़पत्रम् खड्गिधेनुशब्दस्यपूर्व्वमिदम्

**खड्गकोष** पु० खड्ग इव कुष्णाति कुष—अच्। खड्गाकारपत्रे लताभेदे शब्दचि०। ६त०। (खाप) इति ख्याते खड्गावरके काष्ठचर्म्मादिनिर्म्मिते २पदार्थे अत्रार्थे तालव्यान्तोऽपि।

**खड्गट** पु० अड्गे इव टलति अत्र टल—विक्लवे बा० आधारे ड। १इक्षुत्काशे हारा०। तस्याङ्गस्पर्शे असिवत् पीड़ाकरत्वात्तथात्वम्।

**खड्गधेनु** स्त्री खड्गो धेनुरिव यस्याः। छुरिकायाम् तस्या असिपुत्रिकात्वात्तथात्वम्। खड्गा गण्डकी धेनुः जातित्वात् पोटेत्यादिना पा० कर्म्मधा० पूर्व्वनिपातः पुंवद्भावश्च। २धेनुरूपगण्डक्यां मेदि०। [लताभेदे शब्द०।

**खड्गपत्र** पु० खड्ग इव तीक्ष्णं पत्रमस्य। खड्गलताख्ये

**खड्गपरीक्षा** स्त्री खड्गस्य परीक्षा। खड्गस्य रूपघटनादिना शुभाशुभज्ञानोपयोगिन्यां परीक्षायाम् सा च युक्तिकल्पतरौ उक्ता यथा“खड्गरूपं तथा जातिर्नेत्रारिष्टे च भूमिका। ध्वनिर्मानमिति प्रोक्तं खड्गज्ञानात्मकं शुभम्। अभिन्ने दृश्यते यादृक् विच्छिद्य वटिते तथा। यदेव दृश्यते चिह्नं तदङ्गं सम्प्रचक्षते। नीलकृष्णादिकं खड्गे रूपमित्यभिधीयते। तेनैव यत् प्रतीतं स्यात् तत् जातिरिति गद्यते। अङ्गातिरिक्तं यज्जातिस्तन्माहात्म्योपसूचकम्। तन्नेत्रमिति जानीयात् खड्गे खड्गविशारदः। अङ्गातिरिक्तं खड्गादेर्यच्छुभत्वावसूचकम्। तदरिष्टमिति प्राहुर्भूमिरङ्गादिधारणम्। यः खड्गे जायते शब्दोनखदण्डादिनाहते। स ध्वनिस्तुलना मानम् ज्ञानमष्टविधन्त्विदम्। पञ्चाद्या निपुणैः खड्गे सम्भाव्यन्तेऽपि कृत्रिमाः। अन्त्यावकृत्रिमौ ज्ञेयौ तावेव सहजाविति। शतमङ्गानि चत्वारि रूपाणि जातयस्तथा। त्रिंशन्नेत्राणि जानीयादरिष्टानि तथैव च। भूमिश्च द्विविधा ज्ञेया ध्वनिरष्टविधो मतः। मानन्तु द्विविधं प्रोक्तमित्येषां सङ्ग्रहो मतः”। अधिकमसिशब्दे दृश्यम्।

**खड्गपिधान** न० खड्गोऽपिधीयते आच्छाद्यतेऽनेन अपि+धा—करणे ल्युट् अपेरल्लोपः। (खाप) असिकोषे हलायु०। स्वार्थे क। तत्रार्थे हेम०।

**खड्गपुत्रिका** स्त्री खड्गस्य पुत्रिकेव। छुरिकायां मेदि०।

**खड्गफल(क)** पु०खड्गः फलमिव त्वगावृतत्वात् मध्ये यस्य वा कप्। (खाप) इति ख्याते असिपिधाने त्रिका०।

**खड्गमुद्रा** स्त्री “कनिष्ठानामिके बद्ध्वा स्वाङ्गुष्ठेनैव दृश्यते। शिष्टाङ्गुली तु प्रसृते संसृष्टे खड्गमुद्रिका” तन्त्रसारोक्ते शक्तिपूजनाङ्गे मुद्राभेदे।

**खड्गारीट** पु० खड्गस्यारिरिव एटति गच्छति इट—गतौ क। (ढाल) ख्याते चर्म्ममये फलके। खड्गं तद्धारातुल्यव्रतमाच्छति आ+ऋछ—गतौ कीटन्। असिधाराव्रतधारिणि त्रि० मेदि०। तच्च व्रतमसिधाराव्रतशब्दे ५५० पृ० दर्शितम्।

**खड्गिक** पु० खड्गं खड्गाकारोऽस्त्यस्य ठन्। महिषीक्षीरफेने तस्य खड्गाकारवत् शुभ्रतया तथात्वम्। खड्गेन चरति ठन्। १शौनिके मृगयौ च मेदि०।